मित्रगुणान्वितायाम्” कुमा०। उपचारात् तिथेस्तत्राहित्यम्

**जा(या)मित्रवेध** पापात् सप्तमस्थानस्थचन्द्ररूपे योगभेदे। उपयमशब्दे दृश्यम्। “मूलत्रिकोणनिजमन्दिरगोऽथ पूर्णो मित्रर्क्षसौम्यग्टहगोऽथ तदोच्चितो वा जा(या)मित्रवेधविहितानपहृत्य दोषान् दोषाकरः शुभमनेकविधं विधत्ते” ज्यो० त०।

**जामिवत्** अ० उदके निघण्टुः जामीत्यत्र पाठान्तरम्।

**जामेय** त्रि०जाम्या भगिन्या अपत्यम् ढक्। भागिनेये हेम०।

**जाम्बव** न० जम्ब्वाः फलं अण् तस्य वा न लुप्। जम्ब्वाः फले जाम्बवेन निर्वृत्तम् अरीहणा० वुञ्। जाम्बवक तन्निर्वृत्ते त्रि०।

**जाम्बवत्** पु० रामायणप्रसिद्धे ऋक्षराजभेदे। तस्यापत्यं स्त्री अण् ङीप्। २तद्दुहितरि श्रीकृष्णपत्नीभेदे “वासुदेवस्तु निर्जित्य जाम्बवन्तं महाबलम्। लेभे जाम्बवतीं कन्यामृक्षराजस्य सम्मताम्” हरिवं०३८ अ० “जाम्बवत्यौ नृमहितं चारुसद्भावमब्रवीत्” भट्टिः। “ऋक्षराजस्य पुत्रोऽत्र महाप्रज्ञः सुदुर्जयः। पितामहसुतस्यापि जाम्बवानिति दुर्जयः” रामा०। जाम्बवं तदाकारोऽस्त्यस्याः मतुप् मस्य वः पृषो० वलोपः ङीप्। ३नागदमन्यां स्त्री राजनि०। [नागदमन्याम् राजनि०।

**जाम्बवी** स्त्री जाम्बवं तदाकारोऽस्त्यस्याः अण् ङीप्।

**जाम्बवौष्ठ** न० जाम्बवमिव ओष्ठोऽस्य। सुश्रुतोक्ते व्रणादिदहनोपकरणभेदे “अथेमानि दहनोपकरणानि तद्यथा पिप्पल्यजाशकृद्गोदन्तशरशलाकाजाम्बवौष्ठेतरलोहा, क्षौद्रगुडस्नेहाश्च। तत्र पिप्पल्यजाशकृद्गोदन्तशरशलाकास्त्वग्गतानाम्। जाम्बवौष्ठेतरलोहानि मांसगतानाम्। जम्ब्वोष्ठमप्यत्र “जम्ब्वोष्ठेनाग्निवर्णेन तप्तया वा शलाकया” “जम्ब्वोष्ठेनाग्निवर्णेन पश्चाच्छेद्यं दहेद् भिषक्” सुश्रु०।

**जाम्बीर(ल)** न० जम्बीरस्य फलं अण् वेदे रस्य वा लः। १जम्बीरफले तदाकारे २जानुमध्यभागे च। “जाम्बीलेनारण्यम्” यजु० २५।३। “जाम्बीरं जम्बीरतरो, फलं रलयोरभेदः। तदाकारेण जानुमध्यभागो जाम्बीलस्तेनारण्यदेवं प्रीणामीति” वेददी०।

**जाम्बुवत्** पु० जाम्बवत्+पृषो०। ऋक्षराजे द्विरूपको०।

**जाम्बूनद** न० जम्बूनद्यां भवम् अण्। १स्वर्णे तन्नामनामके २कनकाह्वये धूस्तुरे च राजनि०। जम्बूनद्यां तदुत्पत्तिकथा जम्बूद्वीपशब्दे ३०४५ पृ० भाग० व दृश्यम्। “दक्षिणेन तु नीलस्य निषधस्योत्तरेण तु। सुदर्शनो नाम महान् जम्बूवृक्षः सनातनः। सर्वकामफलः पुण्यः सिद्धचारणसेवितः। तस्य नाम्ना समाख्यातो जम्बूद्वीपः सनातनः। योजनानां सहस्रञ्च शतञ्च भरतर्षभ!। उत्सेधो वृक्षराजस्य दिवस्पृक् मनुजेश्वर!। अरत्नीनां सहस्रञ्च शतानि दश पञ्च च। परिणाहस्तु वृक्षस्य फलानां रसभेदिनाम्। पतमानानि तान्युर्वीं कुर्वन्ति विपुलं स्वनम्। सुवन्ति च रसं राजन्! तस्मिन्रजतसन्निभम्। तस्या जम्ब्वाः फलरसो नदी भूत्वा जनाधिप!। मेरुं प्रदक्षिणं कृत्वा सम्प्रयात्युत्तरान् कुरून्। तत्र तेषां मनः शान्तिर्न पिपासा जनाधिप!। तस्मिन् फलरसे पीते न जरा बाधते च तान्। तत्र जाम्बूनदं नाम कनकं देवभूषणम्” भा० भी० ७अ०। “दधद्भिरभितस्तटौ विकचवारिजाम्बूनदैर्विनोदितदिनक्लमाः कृतरुचश्च जाम्बूनदैः” माघः “यदिदं निर्गतं तस्मात्तप्तजाम्बूनदप्रभम्। काञ्चनं धरणीं प्राप्तं हिरण्यमभवत्तदा” रामा० बा० ३८ अ०।

**जाम्बूनदेश्वरी** स्त्री १देवीभेदे २तदीयस्थाने च शब्दार्थचि०

**जायक** न० जयति गन्धान्तरं जि—ण्वुल्। पीतवर्णे सुगन्धिकाष्ठरूपे गन्धद्रव्यभेदे अमरः।

**जाया** स्त्री जायतेऽस्यां जनेर्यक् आत्वञ्च। १पत्न्यां विधिनोढायाम् अमरः। “पतिर्भार्यां संप्रविश्य गर्भो भूत्वेह जायते। जायायास्तद्धि जायात्वं यदस्यां जायते पुनः” मनुः “पतिः शुक्ररूपेण भार्यां संप्रविश्य गर्भतामापद्य तस्यां भार्यायां पुत्ररूपेण जायते। तथा च श्रुतिः “आत्मा वै पुत्रनामासीति। जायायास्तदेव जायात्वं यतोऽस्यां पतिः पुनर्जायते। तथाच बह्वृच ब्राह्मणम्, “पतिर्जायां प्रविशति गर्भो भूत्वेह मातरम्। तस्यां पुनर्नवो भूत्वा दशमे मासि जायते। तज्जाया भवति यदस्यां जायते पुनः। ततश्चासौ रक्षणीयेत्येतदर्थं नाम निर्वचनम्” कुल्लू०। “अथ प्रजानामधिपः प्रभाते जायाप्रतिग्राहितगन्धमाल्याम्” रघु। “कः सन्नद्धे विरहविधुरां त्वय्युपेक्षेत जायाम्” मेघः। २ज्योतिषोक्ते लग्नावधिकसप्तमस्थाने। तत्र स्थाने जायायाः शुभाशुभचिन्तनीयत्वात् तथात्वम्। बहुव्री० जायाशब्दस्य निङ्। युवती जायास्य युवजानिः “युवजानिर्धनुष्पाणिः” भट्टिः। पतिशब्देन द्वन्द्वे तस्याः जम् दम वा भवति। जम्पती दम्पती वा पक्षे जायापती।